# shrIbagalA(valgA)mukhIstotram

# શ્રીબગલા(વલ્ગા)મુખીસ્તોત્રમ્

## Document Information

Text title : bagalAmukhIstotram

File name : bagalAmukhIstotram.itx

Category : devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmale tantre

Latest update : March 31, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીબગલા(વલ્ગા)મુખીસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
ચલત્કનકકુણ્ડલોલ્લસિતચારુગણ્ડસ્થલીં
લસત્કનકચમ્પકદ્યુતિમદિન્દુબિમ્બાનનામ્ ।
ગદાહતવિપક્ષકાં કલિતલોલજિહ્વાંચલાં
સ્મરામિ બગલામુખીં વિમુખવાઙ્મનસ્સ્તમ્ભિનીમ્ ॥ ૧॥

પીયૂષોદધિમધ્યચારુવિલદ્રક્તોત્પલે મણ્ડપે
સત્સિંહાસનમૌલિપાતિતરિપું પ્રેતાસનાધ્યાસિનીમ્ ।
સ્વર્ણાભાં કરપીડિતારિરસનાં ભ્રામ્યદ્ગદાં વિભ્રતીમિત્થં
ધ્યાયતિ યાન્તિ તસ્ય સહસા સદ્યોઽથ સર્વાપદઃ ॥ ૨॥

દેવિ ત્વચ્ચરણામ્બુજાર્ચનકૃતે યઃ પીતપુષ્પાઞ્જલીન્ભક્ત્યા
વામકરે નિધાય ચ મનું મન્ત્રી મનોજ્ઞાક્ષરમ્ ।
પીઠધ્યાનપરોઽથ કુમ્ભકવશાદ્બીજં સ્મરેત્પાર્થિવં
તસ્યામિત્રમુખસ્ય વાચિ હૃદયે જાડ્યં ભવેત્તત્ક્ષણાત્ ॥ ૩॥

વાદી મૂકતિ રઙ્કતિ ક્ષિતિપતિર્વૈશ્વાનરઃ શીતતિ ક્રોધી
શામ્યતિ દુર્જનઃ સુજનતિ ક્ષિપ્રાનુગઃ ખઞ્જતિ ।
ગર્વી ખર્વતિ સર્વવિચ્ચ જડતિ ત્વન્મન્ત્રિણા યન્ત્રિતઃ
શ્રીર્નિત્યે બગલામુખિ પ્રતિદિનં કલ્યાણિ તુભ્યં નમઃ ॥ ૪॥

મન્ત્રસ્તાવદલં વિપક્ષદલને સ્તોત્રં પવિત્રં ચ તે
યન્ત્રં વાદિનિયન્ત્રણં ત્રિજગતાં જૈત્રં ચ ચિત્રં ચ તે ।
માતઃ શ્રીબગલેતિ નામ લલિતં યસ્યાસ્તિ જન્તોર્મુખે
ત્વન્નામગ્રહણેન સંસદિ મુખે સ્તમ્ભો ભવેદ્વાદિનામ્ ॥ ૫॥

દુષ્ટસ્તમ્ભનમુગ્રવિઘ્નશમનં દારિદ્ર્યવિદ્રાવણં
ભૂભૃત્સન્દમનં ચલન્મૃગદૃશાં ચેતઃસમાકર્ષણમ્ ।
સૌભાગ્યૈકનિકેતનં સમદૃશઃ કારુણ્યપૂર્ણેક્ષણમ્

મૃત્યોર્મારણમાવિરસ્તુ પુરતો માતસ્ત્વદીયં વપુઃ ॥ ૬॥

માતર્ભઞ્જય મદ્વિપક્ષવદનં જિહ્વાં ચ સઙ્કીલય
બ્રાહ્મીં મુદ્રય દૈત્યદેવધિષણામુગ્રાં ગતિં સ્તંભય ।
શત્રૂંશ્ચૂર્ણય દેવિ તીક્ષ્ણગદયા ગૌરાઙ્ગિ પીતામ્બરે
વિઘ્નૌઘં બગલે હર પ્રણમતાં કારુણ્યપૂર્ણેક્ષણે ॥ ૭॥

માતર્ભૈરવિ ભદ્રકાલિ વિજયે વારાહિ વિશ્વાશ્રયે
શ્રીવિદ્યે સમયે મહેશિ બગલે કામેશિ વામે રમે ।
માતઙ્ગિ ત્રિપુરે પરાત્પરતરે સ્વર્ગાપવર્ગપ્રદે
દાસોઽહં શરણાગતઃ કરુણયા વિશ્વેશ્વરિ ત્રાહિ મામ્ ॥ ૮॥

સંરમ્ભે ચૌરસઙ્ઘે પ્રહરણસમયે બન્ધને વ્યાધિમધ્યે
વિદ્યાવાદે વિવાદે પ્રકુપિતનૃપતૌ દિવ્યકાલે નિશાયામ્ ।
વશ્યે વા સ્તમ્ભને વા રિપુવધસમયે નિર્જને વા વને વા
ગચ્છંસ્તિષ્ઠંસ્ત્રિકાલં યદિ પઠતિ શિવં પ્રાપ્નુયાદાશુ ધીરઃ ॥ ૯॥

ત્વં વિદ્યા પરમા ત્રિલોકજનની વિઘ્નૌઘસંછેદિની
યોષિત્કર્ષણકારિણી જનમનઃસમ્મોહસન્દાયિની ।
સ્તમ્ભોત્સારણકારિણી પશુમનઃસમ્મોહસન્દાયિની
જિહ્વાકીલનભૈરવી વિજયતે બ્રહ્માદિમન્ત્રો યથા ॥ ૧૦॥

વિદ્યા લક્ષ્મીર્નિત્યસૌભાગ્યમાયુઃ પુત્રૈઃ પૌત્રૈઃ સર્વસામ્રાજ્યસિદ્ધિઃ ।
માનો ભોગો વશ્યમારોગ્યસૌખ્યં પ્રાપ્તં તત્તદ્ભૂતલેઽસ્મિન્નરેણ ॥ ૧૧॥

ત્વત્કૃતે જપસન્નાહં ગદિતં પરમેશ્વરિ ।
દુષ્ટાનાં નિગ્રહાર્થાય તદ્ગૃહાણ નમોઽસ્તુ તે ॥ ૧૨॥

પીતામ્બરાં ચ દ્વિભુજાં ત્રિનેત્રાં ગાત્રકોમલામ્ ।
શિલામુદ્ગરહસ્તાં ચ સ્મરે તાં બગલામુખીમ્ ॥ ૧૩॥

બ્રહ્માસ્ત્રમિતિ વિખ્યાતં ત્રિષુ લોકેષુ વિશ્રુતમ્ ।
ગુરુભક્તાય દાતવ્યં ન દેયં યસ્ય કસ્યચિત્ ॥ ૧૪॥

નિત્યં સ્તોત્રમિદં પવિત્રમિહ યો દેવ્યાઃ પઠત્યાદરાદ્ધૃત્વા
યન્ત્રમિદં તથૈવ સમરે બાહૌ કરે વા ગલે ।
રાજાનોઽપ્યરયો મદાન્ધકરિણઃ સર્પા મૃગેન્દ્રાદિકાસ્તે
વૈ યાન્તિ વિમોહિતા રિપુગણા લક્ષ્મીઃ સ્થિરા સિદ્ધયઃ ॥ ૧૫॥

॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીબગલામુખીસ્તોત્રં સમાપ્તમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

---

*shrIbagalA(valgA)mukhIstotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*